# shrIrAdhikAShTottarashatanAmAvaliH

# શ્રીરાધિકાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : rAdhikAShTottarashatanAmAvaliH

File name : rAdhikAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, rAdhA, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીરાધિકાષ્ટોત્તરશતનામાવલિઃ

રાધાયૈ નમઃ । ગન્ધર્વિકાયૈ । ગોષ્ઠયુવરાજૈકકામિતાયૈ ।
ગન્ધર્વારાધિતાયૈ । ચન્દ્રકાન્ત્યૈ । માધવસઙ્ગિન્યૈ ।
દામોદરાદ્વૈતસખ્યૈ । કાર્તિકોત્કીર્તિદેશ્વર્યૈ ।
મુકુન્દદયિતાવૃન્દધમ્મિલ્લમણિમઞ્જર્યૈ । ભાસ્કરો પાસિકાયૈ ।
વૃષભાનુજાય્ । અનઙ્ગમઞ્જરીજ્યેષ્ઠાયૈ । શ્રીદામાવરજોત્તમાયૈ ।
કીર્તિદાકન્યકાયૈ । માતૃસ્નેહપીયૂષપુત્રિકાયૈ । વિશાખાસવયસે ।
પ્રેષ્ઠવિશાખાજીવિતાધિકાયૈ । પ્રાણાદ્વિતીયલલિતાયૈ ।
વૃન્દાવનવિહારિણ્યૈ નમઃ ॥ ૨૦

લલિતાપ્રાણરક્ષૈકલક્ષાયૈ નમઃ । વૃન્દાવનેશ્વર્યૈ ।
વ્રજેન્દ્રગૃહિણ્યૈ । કૃષ્ણપ્રાયસ્નેહનિકેતનાયૈ ।
વ્રજગોગોપગોપાલીજીવમાત્રૈકજીવનાયૈ । સ્નેહલાભીરરાજેન્દ્રાયૈ ।
વત્સલાયૈ । અચ્યુતપૂર્વજાયૈ । ગોવિન્દપ્રણયાધારાયૈ ।
સુરભીસેવનોત્સુકાયૈ । ધૃતનન્દીશ્વરક્ષેમાયૈ । ગમનોત્કણ્ઠિમાનસાયૈ ।
સ્વદેહાદ્વૈતતાદૃષ્ટધનિષ્ઠાધ્યેયદર્શનાયૈ ।
ગોપેન્દ્રમહિષીપાકશાલાવેદિપ્રકાશિકાય ।
આયુર્વર્ધાકરદ્ધાનારોહિણીઘ્રાતમસ્તકાયૈ । સુબલાન્યસ્તસારૂપ્યાયૈ ।
સુબલાપ્રીતિતોષિતાયૈ । મુખરાદૃક્સુધાનપ્ત્ર્યૈ ।
જટિલાદૃષ્ટિભાસિતાયૈ । મધુમઙ્ગલનર્મોક્તિજનિતસ્મિતચન્દ્રિકાયૈ ।
પૌર્ણમાસીબહિઃખેલત્પ્રાણપઞ્જરસારિકાયૈ નમઃ ॥ ૪૦

સ્વગણાદ્વૈતજીવાતવે નમઃ । સ્વીયાહઙ્કારવર્ધિન્યૈ ।
સ્વગણોપેન્દ્રપાદાબ્જસ્પર્શાલમ્ભનહર્ષિણ્યૈ ।
સ્વીયવૃન્દાવનોદ્યાનપાલિકીકૃતવૃન્દકાયૈ ।
જ્ઞાતવૃન્દાટવીસર્વલતાતરુમૃગદ્વિજાયૈ ।
ઈષચ્ચન્દનસઙ્ઘૃષ્ટનવકાશ્મીરદેહભાસે । જપાપુષ્પહપ્રીતહર્યૈ ।
પટ્ટચીનારુણામ્બરાયૈ । ચરણાબ્જતલજ્યોતિરરુણીકૃતભૂતલાયૈ ।

હરિચિત્તચમત્કારિચારુનૂપુરનિઃસ્વનાયૈ ।
કૃષ્ણશ્રાન્તિહરશ્રેણીપીઠવલ્ગિતઘણ્ટિકાયૈ ।
કૃષ્ણસર્વસ્વપીનોદ્યત્કુચાઞ્ચન્મણિમાલિકાયૈ ।
નાનારત્નોલ્લસચ્છઙ્ખચૂડચારુભુજદ્વયાયૈ ।
સ્યમન્તકમણિભ્રાજન્મણિભ્રાજન્મણિબન્ધાતિબન્ધુરાયૈ ।
સુવર્ણદર્પણજ્યોતિરુલ્લઙ્ઘિમુખમણ્ડલાયૈ ।
પક્વદાડિમબીજાભદન્તાકૃષ્ટાઘભિચ્છુકાયૈ ।
અબ્જરાગાદિસૃષ્ટાબ્જકલિકાકર્ણભૂષણાયૈ । સૌભાગ્યકજ્જલાઙ્કાક્ત-
નેત્રાનન્દિતખઞ્જનાયૈ । સુવૃત્તમૌક્તિકામુક્તાનાસિકાતિલપુષ્પિકાયૈ ।
સુચારુનવકસ્તૂરીતિલકાઞ્ચિતભાલકાયૈ ॥ ૬૦

દિવ્યવેણીવિનિર્ધૂતકેકીપિઞ્છવરસ્તુત્યૈ ।
નેત્રાન્તસારવિધ્વંસકૃતચાણૂરજિદ્ધૃત્યૈ ।
સ્ફુરત્કૈશોરતારુણ્યસન્ધિબન્ધુરવિગ્રહાયૈ ।
માધવોલ્લાસકોન્મત્તપિકોરુમધુરસ્વરાયૈ ।
પ્રાણાયુતશતપ્રેષ્ઠમાધવોત્કીર્તિલમ્પટાયૈ ।
કૃષ્ણાપાઙ્ગતરઙ્ગોદ્યત્સ્મિતપીયૂષબુદ્બુદાયૈ ।
પુઞ્જીભૂતજગલ્લજ્જાવૈદગ્ધીદિગ્ધવિગ્રહાયૈ । કરુણાવિદ્રવદ્દેહાયૈ ।
મૂર્તિમન્માધુરીઘટાયૈ । જગદ્ગુણવતીવર્ગગીયમાનગુણોચ્ચયાયૈ ।
શચ્યાદિસુભગાવૃન્દવન્દ્યમાનોરુસૌભગાયૈ ।
વીણાવાદનસઙ્ગીતરસલાસ્યવિશારદાયૈ । નારદપ્રમુખોદ્ગીત-
જગદાનન્દિસદ્યશસે । ગોવર્ધનગુહાગેહગૃહિણીકુઞ્જમણ્ડનાયૈ ।
ચણ્ડાંશુનન્દિનીબદ્ધભગિનીભાવવિભ્રમાયૈ ।
દિવ્યકુન્દલતાનર્મસખ્યદામવિભૂષણાયૈ ।
ગોવર્ધનધરાહ્લાદિશૃઙ્ગારરસપણ્ડિતાયૈ ।
ગિરીન્દ્રધરવક્ષઃશ્રિયૈ । શઙ્ખચૂડારિજીવનાય ।
ગોકુલેન્દ્રસુતપ્રેમકામભૂપેન્દ્રપટ્ટણાય નમઃ ॥ ૮૦

વૃષવિધ્વંસનર્મોક્તિસ્વનિર્મિતસરોવરાયૈ ।
નિજકુણ્ડજલક્રીડાજિતસઙ્કર્ષણાનુજાય ।
મુરમર્દનમત્તેભવિહારામૃતદીર્ઘિકાયૈ ।
ગિરીન્દ્રધરપારીન્દ્રરતિયુદ્ધોરુસિંહિકાય ।
સ્વતનૂસૌરભોન્મત્તીકૃતમોહનમાધવાયૈ ।

દોર્મૂલોચ્ચલનક્રીડાવ્યાકુલીકૃતકેશવાયૈ ।
નિજકુણ્ડતતીકુઞ્જક્લૃપ્તકેલીકલોદ્યમાયૈ ।
દિવ્યમલ્લીકુલોલ્લાસિશય્યાકલ્પિતવિગ્રહાયૈ ।
કૃષ્ણવામભુજન્યસ્તચારુદક્ષિણગણ્ડકાયૈ ।
સવ્યબાહુલતાબદ્ધકૃષ્ણદક્ષિણસદ્ભુજાયૈ ।
કૃષ્ણદક્ષિણચારૂરુશ્લિષ્ટવામોરુરમ્ભિકાયૈ ।
ગિરીન્દ્રધરદૃગ્વક્ષોમર્દિસુસ્તનપર્વતાયૈ ।
ગોવિન્દાધરપીયૂષવાસિતાધરપલ્લવાયૈ ।
સુધાસઞ્ચયચારૂક્તિશીતલીકૃતમાધવાયૈ ।
ગોવિન્દોદ્ગીર્ણતામ્બૂલરાગરજ્યત્કપોલિકાયૈ ।
કૃષ્ણસમ્ભોગસફલીકૃતમન્મથસમ્ભવાયૈ ।
ગોવિન્દમાર્જિતોદ્દામરતિપ્રસ્વિન્નસન્મુખાયૈ ।
વિશાખાવિજિતક્રીડાશાન્તિનિદ્રાલુવિગ્રહાયૈ ।
ગોવિન્દચરણન્યસ્તકાયમાનસજીવનાયૈ ।
સ્વપ્રાણાર્બુદનિર્મઞ્છ્યહરિપાદરજઃકણાયૈ નમઃ ॥ ૧૦૦

અણુમાત્રાચ્યુતાદર્શશપ્યમાનાત્મલોચનાયૈ નમઃ ।
નિત્યનૂતનગોવિન્દવક્ત્રશુભ્રાંશુદર્શનાયૈ ।
નિઃસીમહરિમાધુર્યસૌન્દર્યાદ્યેકભોગિન્યૈ ।
સાપત્ન્યધામમુરલીમાત્રભાગ્યકટાક્ષિણ્યૈ ।
ગાઢબુદ્ધિબલક્રીડાજિતવંશીવિકર્ષિણ્યૈ ।
નર્મોક્તિચન્દ્રિકોત્ફુલ્લકૃષ્ણકામાબ્ધિવર્ધિન્યૈ ।
વ્રજચન્દ્રેન્દ્રિયગ્રામવિશ્રામવિધુશાલિકાયૈ ।
કૃષ્ણસર્વેન્દ્રિયોન્માદિરાધેત્યક્ષરયુગ્મકાયૈ નમઃ ॥ ૧૦૮

ઇતિ શ્રીરાધિકાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIrAdhikAShTottarashatanAmAvaliH*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*